जाङ्गलो देशो बहुधान्यादिसंयुतः” कुल्लू० धृतवाक्योक्त- लक्षणे ४देशभेदे पु०। भावप्र० अन्यथा तल्लक्षणमुक्तं यथा “आकाशशुभ्र उच्चश्च स्वल्पपानीयपादपः। शमी- करीरविल्वार्कपीलुकर्कन्धुसङ्कुलः। हरिणैणर्ष्यपृषत गोकर्णखरसङ्कुलः। सुस्वादुफलवान् देशो वातलो जाङ्गलः स्मृतः”।

“बहूदकनगोऽनूपः कफमारुतरोगवान्। जाङ्गलो- ऽल्पाङ्गशाखी च पित्तासृङ्मारुतोत्तरः” तद्देशगुणा- स्तत्रोक्ता जाङ्गलानां पशूनां विशेषः तन्मांस गुणाश्च तत्रैवोक्ता यथा “हरिणैणकुरङ्गर्ष्य पृषतन्यङ्कुशंवराः। राजीवोऽपि च मुण्डी चेत्याद्या जाङ्गलसंज्ञकाः। हरिणस्ताम्रवर्णः स्यादेणः कृष्णः प्रकीर्त्तितः। कुरङ्ग ईषत्ताम्रः स्यादेणतुल्याकृतिर्म- हान्। ऋष्यो नीलाङ्गको लोके सारोझ इति कीर्त्तितः। पृषतश्चन्द्रबिन्दुः स्याद् हरिणात् किञ्चिदल्पकः। न्यङ्कुर्बहुविषाणोऽथ शंवरो गवयो महान्। राजीवस्तु मृगो ज्ञेयो राजिभिः परितोवृतः। यो मृगः शृङ्गहीनः स्यात् स मुण्डीति निगद्यते। जाङ्गलाः प्रायशः सर्वे पित्तश्लेष्महराः स्मृताः। किञ्चिद्वातकराश्चापि लघवो बलवर्द्धनाः”। “तत्रेमे कुरुपाञ्चालाः शाल्वा माद्रेयजाङ्गलाः” भा० भी० ६अ०। ५कपिञ्जलखगे पुंस्त्री मेदि० स्त्रियां जातित्वात् ङीष्।

**जाङ्गलपथिक** त्रि० जङ्गलस्थः पन्थाः अच् समा०। तेना- हृतं तेन गच्छति वा ठञ्। १जङ्गलपथेनाहृते २तेन गन्तरि च।

**जाङ्गुल** न० गम–यङ् लुक् बा० डुल पृषो० दीर्घः। १विषे तस्य कुटिलगतित्वात् तथात्वं २जालिनीफले शब्दरत्ना०।

**जाङ्गुलि** पु०गम–यङ् लुक् बा०डुलि।१विषवैद्ये शब्दरत्ना०। “परीक्षितं समश्नीयात् जाङ्गुलिभिर्भिषग्वृतः” वैद्यकम्।

**जाङ्गुलिक** पु० जाङ्गुली विषविद्या तामधीते वेद वा तया दीव्यति वा ठञ्। विषवैद्ये अमरः। [हेमच०।

**जाङ्गुली** स्त्री जाङ्गुलस्य विषस्येयम् अण्। विषविद्यायाम्

**जाङ्घि** त्रि० जङ्घायां भवः तस्या इदं वा वाह्वादेराकृति- गणत्वात् इञ्। १जङ्घाभवे २तत्सम्बन्धिनि च।

**जाङ्घिक** त्रि० जङ्घाभ्यां जीवति वेतना० ठञ्। १धावके (धाओड़े) २उष्ट्रे पुंस्त्री० ३मीकारीवृक्षे पु०राजनि०।

**जाजलि** पु० ऋषिभेदे तस्य तपश्चरणकथादिकं भा०शा०२६२अ दृश्यम् “वने वनचरः कश्चिज्जाजलिर्नाम वै द्विजः” इत्यादि। स च प्रवरप्रवर्त्तकः हेमा० व्र० दृश्यम्।

**जाजिन्** त्रि० जज–योधे–ताच्छील्ये णिनि। योधशीले। “जजौजाजाजिजिज्जाजी” माघः।

**जाझ्झा(ट)लि** पु०जझ(झ)ट–संघाते घञ्। तं लाति ला– बा० डि। वृक्षभेदे अमरः।

**जाटालिका** स्त्री कुमारानुचरमातृभेदे “जाटालिका काम- चरी दीर्घजिह्वा बलोत्कटा” भा० शा० ४७ अ०।

**जाटासुरि** पु० जटासुरस्यापत्यम् इञ्। जटासुरापत्ये “जाटा- सुरिर्भीमसेनिं नानाशस्त्रैरवाकिरत्” भा०द्रो०१७५ अ०।

**जाटिलिक** पुंस्त्री जटिलिकाया अपत्यं शिवा०अण्। जटिलिकाया अपत्ये स्त्रियां ङीप्।

**जाठर** पु० जठरे भवः अण्। जठरस्थिते १वह्नौ “जाठरो भगवानग्निरीश्वरोऽन्नस्य पाचकः” सुश्रु०। २कुमारानु- चरभेदे “विद्युताक्षो धनुर्वक्त्रो जाठरो मारुताशनः” भा० श० ४६अ०। तस्येदमण्। ३जठरसम्बन्धिनि त्रि० स्त्रियां ङीप्। “नानाशनः स्यान्न महाशनः स्यादलोलुपः साधु भिरागतः स्यात्। यात्रार्थमाहारमिहाददीत तथास्य स्याज्जठरी द्वारगुप्तिः” भा० शा० २७० अ०।

**जाठर्य्य** त्रि० जठरे भवः बा० ञ्य। जठरभवे रोगादौ “एतन्नवायसमेतेन जाठर्य्यं न भवति सन्नोऽग्निराप्या- यते” सुश्रु०।

**जाडार** पुंस्त्री जडस्यापत्यम् वा आरक्। जडस्यापत्ये।

**जाड्य** न०जडस्य भावः ष्यञ्।१जडतायां २मौर्ख्ये च हेमच० “आलस्यश्रमगर्भाद्यैर्जाड्यं जृम्भासितादिकृत्” सा०द०। “इदं जाड्यमिदं मौढ्यमिदमत्यद्भुतं वचः” हरिवं०२०९अ०।

**जाड्यारि** पु० ६त०। जम्बीरे राजनि०।

**जात** त्रि० जन–कर्त्तरि क्त।१उत्पन्ने २व्यक्ते च भावे क्त। ४जन्मनि ५समूहे च मेदि० तत्र उत्पन्ने “तस्मात् कुमारं जातं घृतं वैवाग्रे प्रतिलेहयन्ति स्तनं वानुधापयन्ति” शत०ब्रा०१४।४।२।४ “सुवीजं चैव सुक्षेत्रे जातं संपद्यते यथा” मनुः संघे “निःशेषविश्राणितकोशजातम्” रघुः। “चतुर्विधस्थूलशरीरजातम्” वेदान्तः। “सर्वेषां धन- जातानामाददीताग्र्यमग्रजः” मनुः।

**जातक** त्रि० जात+स्वार्थे क। १उत्पन्ने “उभौ तौ नार्हतो भागं जारजातककामजौ” मनुः। जातं जन्म तदधिकृत्य कृतो ग्रन्थः अण् संज्ञायां कन्। २होरातन्त्रे। तच्च नानाज्योतिर्विद्भिर्नानाविधं रचितं तत्र वृहज्जातकस्यैव अतिप्रामाणिकत्वात् तच्छास्त्रप्रतिपाद्यविषया ग्रन्थकृता